दैनिकं ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ताः
हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः
himsanskritvartah
e-Sanskritnewspaper
नवा प्रेरणा नवोत्साहः
▪ पृष्ठ-3 ▪ वर्ष-3 ▪ अङ्क-362
1
25.10.2024 शुक्रवासरः वि.सं. २०८१ कार्तिककृष्णनवमी कार्तिक 9 प्रविष्टांशः
Website- www.himsanskritam.com Email-himsanskrit@gmail.com

## 51st AIOC UDUPI: योगगुरुणा स्वामीरामदेवेन तत्वनगर्य्याम् उडुपी-कृष्णमठे कृतम् ५१ तमस्य अखिलभारतीय- प्राच्यविद्यासम्मेलनस्य उद्घाटनम्






### अग्रिमयुगः संस्कृतस्य सनातनस्य च- योगगुरुः स्वामीरामदेवः

हिमसंस्कृतवार्ताः - उडुपी। अखिलभारतीयप्राच्यविद्यासम्मेलनं पुणेद्वारा भारतीयविद्वत्परिषत् पर्यायश्रीपुत्तिगेमठः केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली इत्येतेषां संयुक्तोपक्रमे तत्त्वनगर्य्याम् उडुपी-कृष्णमठे ५१ तमस्य अखिलभारतीयप्राच्यविद्यासम्मेलनस्य उद्घाटनं योगगुरुणा स्वामीरामदेवेन कृतम्। दिल्लीनगरस्य केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. श्रीनिवासवरखेडी इत्यनेन ५१तमे अखिलभारतीयप्राच्यविद्यासम्मेलने समागतानां सर्वेषां सत्पुरुषाणाम् आचार्याणां विदुषां शोधपत्रप्रस्तोतृणां प्रतिनिधीनां च स्वागतम् विहितम्। प्रो. वरखेडी इत्यनेन अपि उक्तं यत् भारतस्य बौद्धिक-ऐतिहासिकस्थले उडुपीनगरे संस्कृतजगतः विविध- आध्यात्मिक-धार्मिकक्षेत्रेभ्यः विद्वांसः, भारतीयसंस्कृतेः, संस्कृतविषयाणां च विविधशाखानां विद्वांसः, तथैव संस्कृतविषयाणां च विभिन्नराज्यानां छात्राः समागताः सन्ति। अतः एतद् गौरवस्य विषयः वर्तते। उद्घाटनसत्रं सम्बोधयता कथितं यत् अग्रिमयुगः संस्कृतस्य सनातनस्य च अस्ति। सः कालः आयाति यदा जनाः वदिष्यन्ति यत् संस्कृतेन सर्वं कर्तुं शक्यते। जनाः वदन्ति स्म संस्कृतं पठित्वा किं करिष्यति। परञ्च अहं गुरुकुले पठित्वा संस्कृतं पठित्वा योगविद्यया पतञ्जलि- उद्योगेन च बहुकिमपि साधितवान्। अस्मिन् अखिलभारतीये प्राच्यविद्यासम्मेलने संस्कृतविदुषां छात्राणां समागमेन एतत् स्पष्टीभूतं एत् अग्रिमकालः संस्कृतस्य कालः अस्ति। पतञ्जलिविश्वविद्यालयस्य हरिद्वारस्य कुलपतिः आयुर्वेदाचार्यः आचार्यः बालकृष्णः अपि स्वीयान् विचारान् प्रकटितवान्, उक्तवान् च यत् अस्माभिः यद् साहित्यं पठ्यते सम्प्रति तस्य परिमार्जनस्य आवश्यकता अस्ति। अस्माकं भारतीये इतिहासे बहुकिमपि दूषितमस्ति यस्य अनुसन्धानम् आवश्यकम् वर्तते। सर्वकारः तु स्वकीयं कार्यं करोति परन्तु पतञ्जलिसंस्थानम् स्वीये स्तरे अपि इतिहासलेखनस्य अनुसन्धानस्य च कार्यं करोति। वैश्विकेतिहासस्य प्रायशः १० सहस्रस्थलानि अस्माभिः अन्वेषितानि। सम्मेलनं सरलस्य सम्भाषणात्मकस्य च संस्कृतस्य प्रवर्तकः शिक्षाविदः, भारतसर्वकारस्य भारतीय- भाषा- परिषदश्च अध्यक्षः पद्मश्री चमुकृष्णशास्त्री महोदयः अपि सम्बोधितवान्। केन्द्रीय- संस्कृत-विश्वविद्यालयस्य प्रकाशनविभागस्य पुस्तक-श्रृंखलानां सम्पादकः एवं संयुक्तनिदेशकः प्रो. सुज्ञान कुमार मोहन्ती एवं प्रो. गणेश टी. पण्डितः (उभौ) ज्ञापितवन्तौ यत् कुलपतिवर्यस्य दूरदर्शी मार्गदर्शनेन सरलमानकसंस्कृतं (SSS) जनानां कृते सुलभं कर्तुं, तस्य अग्रे प्रचारार्थं च तत्सम्बद्धानि बहूनि पुस्तकानि अपि सम्मेलने विमोचितानि। उल्लेखनीयं यत् कुलपतिः प्रो. श्रीनिवासवरखेड़ी इत्यनेन लिखितस्य संस्कृतभाषायां लिखितस्य अतीव महत्त्वपूर्णस्य स्वतन्त्रसमीक्षापुस्तकस्य 'शास्त्रपद्धतिः' इत्यस्यापि मुख्यातिथिना विद्वद्भिः गणमान्यजनैः साकं च विमोचनं कृतम्। यस्य हिन्दीभाषायां अनुवादः प्रो अजयकुमारमिश्रः केन्द्रीयसंस्कृतविश्वविद्यालयः अकरोत्। अखिलभारतीये प्राच्यविद्यासम्मेलने अस्मिन् पारम्परिकपरम्पराभिः सर्वेषाम् अभिनन्दनं विहितम्। अष्टौ मठानाम् उडुपिनगर्य्यां मठानाम् पूज्यानां स्वामिनाम् उपस्थितौ सम्मेलनस्य गौरवम् इतोऽपि वर्धितम्। सर्वैः पूज्यपादैः मुख्यातिथिना स्वामीरामदेवेन च संस्कृते एवं सम्बोधनम् कृतम्। सम्मेलने प्राच्यविद्यायाः संस्कृतस्य विविधविषयाणां पक्षेषु प्रायः २५ स्थलेषु शोधपत्राणां प्रस्तुतयः, युवकविसङ्गोष्ठी, सांस्कृतिकाः कार्यक्रमाः, युवपण्डितपरिषद्, वादकथाविनोदः, भारतीयज्ञानपरम्परा दशा दिशा च इत्यादयः विविधाः कार्यक्रमाः अपि भविष्यन्ति।

### सम्मेलने योगगुरु बाबारामदेव द्वारा त्रिदिवसात्मकं योगशिविरम्

ध्यातव्यं वर्तते यत् सम्मेलने अस्मिन् पतञ्जलिविश्वविद्यालयस्य अपि सहयोगः वर्तते। योगगुरु बाबारामदेवः आचार्यः बालकृष्णश्च पूर्वदिने एव विशेषविमानेन उडुपीम् प्राप्तवन्तौ। अखिलभारतीये प्राच्यविद्यासम्मेलने सर्वेभ्यः त्रिदिवसात्मकस्य योगशिविरस्य प्रातःकालीन सत्रस्य आयोजनम् क्रियते।

### जर्मनदेशीयः कुलाधिपतिः ओलाफ-शोल्ज इत्येषः भारतस्य यात्रायाम् अस्ति



जर्मनदेशीयः कुलाधिपतिः ओलाफ-शोल्ज इत्येषः गतदिनात् दिनत्रयं यावत् भारतस्य यात्रायाम् अस्ति। अत्रावसरे श्रीशोल्जइत्येषः सप्तमे अन्तासर्वकारीय-परामर्श-समूहे भागं स्वीकरिष्यति। प्रधानमन्त्री नरेन्द्रमोदी श्री शोल्जः च शुक्रवासरे अस्य समूहस्य उपवेशनस्य सहाध्यक्षतां करिष्यतः। समूहोऽयं एका सर्वकारीयव्यवस्थास्ति, यस्यान्तर्गतं उभयोः पक्षयोः मन्त्रिणः निजाधिकार-क्षेत्रेषु विचारविमर्श विधास्यन्ति अपि च निष्कर्षस्य प्रतिवेदनानि प्रधानमन्त्रिणे कुलाधिपतये च प्रस्तुवन्ति।

### आईटीबीपी शौर्यस्य, समर्पणस्य प्रतीकत्वेन जनानां रक्षणाय च सदैव तत्परः अस्ति-प्रधानमन्त्री

भारत-तिब्बत सीम्नि आरक्षिदलस्य (ITBP) इत्यस्य स्थापनादिवसः आचरितः। अस्मिन् अवसरे स्वस्य सन्देशे प्रधानमन्त्री नरेन्द्रमोदी ITBP हिमवीरेभ्यः तेषां परिवारेभ्यश्च अभिवादनं कृतवान् । एकस्मिन् सामाजिक संजालीय-सन्देशे श्रीमोदी अवदत् यत् आईटीबीपी शौर्यस्य, समर्पणस्य प्रतीकत्वेन जनानां रक्षणाय च सदैव तत्परः अस्ति। सः प्राकृतिकापदुद्धरणकार्याणां कृते तेषां प्रयत्नानां प्रशंसाम् अपि अकरोत् ।

### गीतोपदेशः

**कुल क्षये प्रणश्यन्ति**
**कुलधर्माः सनातनाः |**
**धर्मे नष्टे कुलं कृत्स्नमधर्मो**
**ऽभिभवत्युत || ३९ ||**

**शब्दार्थ-** कुल-क्षये – कुल का नाश होने पर; प्रणश्यन्ति – विनष्ट हो जाती हैं; कुल-धर्माः – पारिवारिक परम्पराएँ; सनातनाः – शाश्र्वत; धर्मे – धर्म; नष्टे – नष्ट होने पर; कुलम् – कुल को; कृत्स्नम् – सम्पूर्ण; अधर्मः – अधर्म; अभिभवति – बदल देता है; उत – कहा जाता है |

**भावार्थ**

कुल का नाश होने पर सनातन कुल-परम्परा नष्ट हो जाती है और इस तरह शेष कुल भी अधर्म में प्रवृत्त हो जाता है

**सूचना-** हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

### सी. सी. ई. ए. इत्यनेन अमरावती-माध्यमेन एरूपलम-नम्बुरु इत्यनयोः मध्ये नूतनाय-रेलसंपर्काय स्वीकृतिः प्रदत्तास्ति-अश्विनी वैष्णवः

आर्थिक-प्रकरणानां मन्त्रिमण्डलीय समित्या अष्टनवत्यधिक-सप्तशतोत्तर-षड्सहस्रकोटि- रुप्यकाणां द्वाभ्यां रेलपरियोजनाभ्यां कृते स्वीकृतिः प्रदत्ता। प्रथम-परियोजनायां नरकटियागंजतः रक्सौल-सीतामढ़ी-दरभंगापर्यन्तं रेलवे संपर्कतायाः द्विविधीकरणं जातं तथैव सीतामढ़ी- मुजफ्फरपुरखण्डौ अपि तत्र सम्मिलितौ स्तः। अयं मार्गः षड् पञ्चाशदधिक-द्विशत किलोमीटर परिमितं विस्तृतः वर्तते। इयं परियोजना नेपालपूर्वोत्तरभारतयोः सहैव सीमवर्तीक्षेत्रेषु च संपर्कतां दृढीकरिष्यति। अनेन यात्रिणां कृते गमनागमनं सुकरं भविष्यति तथैव क्षेत्रस्य सामाजिकार्थिक विकासः अपि भवति। केन्द्रीय-मन्त्रिमण्डलस्य उपवेशनानन्तरं नवदिल्ल्यां वार्ताहरान् विज्ञापयन् सूचना एवं प्रसारणमन्त्री अश्विनी वैष्णवः प्रोक्तवान् यत् सी. सी. ई. ए. इत्यनेन अमरावती-माध्यमेन एरूपलम-नम्बुरु इत्यनयोः मध्ये नूतनाय-रेलसंपर्काय स्वीकृतिः प्रदत्तास्ति। अस्य विस्तारस्तावत् सप्तपञ्चाशत् किलोमीटर-यावत् भविष्यति।

## HRTC- हिमाचलपथपरिवहननिगमः २५० डीजलबसयानानि क्रेष्यति, ३२० ई-बसयानानां निविदाप्रक्रिया आरब्धा; कार्यशालानामपि उन्नयनं क्रियते






**हिमसंस्कृतवार्ताः - शिमला।** उपमुख्यमन्त्री मुकेश अग्निहोत्री इत्यनेन उक्तं यत् राज्यसर्वकारेण मन्त्रिमण्डलस्य सदस्यैः विधायकैः च सह चर्चां कृत्वा हिमाचलपथपरिवहननिगमस्य कृते २५० डीजलबसयानानि क्रेतुं निर्णयः कृतः। ३२ तथा ३६ आसनयुतानि लघुडीजलबसयानानि क्रीयन्ते येन एतानि बसयानानि दुर्गमक्षेत्रेषु चालयितुं शक्यन्ते। ३२० ई-बसयानानां निविदाप्रक्रिया अपि आरब्धा अस्ति ।

### २५ नवीनानि वोल्वोयानानि, १०० टेम्पो यात्रिकयानानि अपि क्रीयन्ते

गुरुवासरे पत्रकारसम्मेलने मुकेश अग्निहोत्री उक्तवान् यत् हिमाचलपथपरिवहननिगमस्य कृते २५ नवीननि वोल्वोयानानि, १०० टेम्पोट्रेवलरयानानि अपि क्रीयन्ते। ई-बस-यानानां चार्जिंग-स्थानकानाम् स्थापनायां, कार्यशालानां उन्नयनार्थं च ११० कोटिरूप्यकाणां व्ययितानि भविष्यति । सः अवदत् यत् भाजपानेतारः एच्.आर.टी.सी. बसयानेभ्यः देवी-देवतानां चित्राणि हर्तुं मिथ्यावार्ताः प्रसारिताः, यदा तु एचआरटीसी देवी-दर्शनयोजनायाः अन्तर्गतं बसयानानि चालयति। एचआरटीसी इत्यस्य वस्तुनीतिविषये अपि जनाः भ्रमिताः आसन्, यदा तु अस्यां योजनायां केवलं कूरियरसेवायाः दराणि एव निर्धारितानि सन्ति ।

सः अवदत् यत् महिलानां बालकानां च कृते प्रदत्तापकर्षं निरन्तरं भविष्यति। अधुना राजनैतिककार्यक्रमेभ्यः, सभाभ्यः वा अन्येभ्यः कार्यक्रमेभ्यः एचआरटीसी-बस-यानानि आरक्षणं कृत्वा ५० प्रतिशतं धनं पूर्वमेव दातव्यं भविष्यति, येन निगमस्य हानिः न भवति। भाजपासर्वकारस्य कार्यकाले सभायाः कृते आरक्षित-कृतानां निगमस्य बसयानानां कृते अद्यापि प्रायः ५ कोटिरूप्यकाणां दायित्वं अवशिष्टम् अस्ति।

**प्रबन्धनिदेशकस्य रोहनठाकुरस्य निगमे उन्नयनार्थं प्रशंसा कृता**

उपमुख्यमन्त्री मुकेशः अग्निहोत्री निगमस्य प्रबन्धनिदेशकं आईएएस-अधिकारिणं रोहनचन्द ठाकुरं एचआरटीसी-मध्ये कृतेषु उन्नयनेषु प्रशंसितवान्। मुकेशः अवदत् यत् निगमस्य सेवासु, वित्तीयस्थितौ च उन्नयनार्थं प्रबन्धनिदेशकेन कृतप्रयत्नाः आश्चर्यजनकं परिणामं प्राप्तवन्तः।

## CM Sukhu: केन्द्रीयमन्त्रिणा नितिनगडकरिणा सह अमिलत् मुख्यमंत्री सुक्खुः, राज्ये ४ नवीनमार्गनिर्माणस्य प्रस्तावम् अयच्छत्



**हिमसंस्कृतवार्ताः - नवदेहली।** मुख्यमन्त्री सुखविन्दरसिंह सुक्खुः नवीदिल्लीनगरे केन्द्रीय- मार्गपरिवहन- राजमार्गमन्त्री नितिनगडकरी इत्यनेन सह मिलित्वा राज्यस्य विविधमार्गाणां सेतूनां रज्जुमार्गपरियोजनानां विषये विस्तरेण चर्चां कृतवान्। सः केन्द्रीयमन्त्रीं राज्याय उदारवित्तीयसहायतां सहकार्यं च कर्तुम् आग्रहं कृतवान्। राज्ये चतुर्णां नूतनानां मार्गपरियोजनानां निर्माणार्थं केन्द्रीयमन्त्रिणः समक्षं प्रस्तावम् उपस्थापयन् मुख्यमन्त्री अवदत् यत् हिमाचलसदृशे पर्वतीयराज्ये मार्गाः एव मुख्यं परिवहनसाधनं भवन्ति, अतः समग्रतया विकासाय पर्यटनसुविधायै च मार्गाणां सुदृढीकरणं अत्यन्तं महत्त्वपूर्णम् अस्ति च। सः आग्रहं कृतवान् यत् भारतस्य राष्ट्रियराजमार्गप्राधिकरणेन राज्ये यथासंभवं अधिकाः कन्दरानिर्माणस्य सम्भावनाः अन्वेष्टव्याः, येन मार्गाणां परिपालनस्य व्ययः न्यूनीभवति। मुख्यमन्त्री सोलन-परवाणू-मार्गस्य पुनः संरेखणस्य समीक्षां कृत्वा दुर्घटनाप्रवणस्थानानि मनसि कृत्वा नूतनविस्तृतपरियोजनाप्रतिवेदने विचारं कर्तुं आग्रहं कृतवान्। शिमला- मटौर- राष्ट्रियराजमार्गस्य अवशिष्टेषु भागेषु चतुष्पंक्तिकरणम् अपि सः आग्रहं कृतवान्। केन्द्रीयमन्त्री राज्यसर्वकाराय यथासम्भवं साहाय्यं प्रदातुम् आश्वासनं दत्तवान्। अस्मिन्नवसरे मुख्यमन्त्रिणं सह प्रधानपरामर्शकः रामसुभगसिंहः राज्यसर्वकारस्य च वरिष्ठाधिकारिणः उपस्थिताः आसन्।

## Electricity Subsidy: ये दातुं शक्नुवन्ति ते अनुदानं न गृह्णीयुः जनेभ्यः विद्युत्-अनुदानं स्वयमेव त्यक्तुं सर्वकारः आह्वानं करिष्यति



हिमसंस्कृतवार्ताः - शिमला। हिमाचलप्रदेशे १२५ यूनिटपर्यन्तं निःशुल्कविद्युत्, तस्मिन् अनुदानं च विषये केचन महत्त्वपूर्णाः निर्णयाः सर्वकारेण कृताः, परन्तु ततः पूर्वं सर्वकारः राज्यस्य जनेभ्यः आह्वानं करिष्यति यत् ये धनं व्ययितुं शक्नुवन्ति ते स्वेच्छया स्वसहायतां त्यजन्तु इति। एतादृशेन आह्वानेन विद्युत् अनुदानस्य विषये सर्वकारः अग्रे गमिष्यति। मन्त्रिमण्डलस्य उपसमित्या एतत् स्वपरामर्शेषु समाविष्टम् अस्ति तथा च सर्वकारः इच्छति यत् यस्य व्यक्तेः आवश्यकता अस्ति सः एव अनुदानं प्राप्नुयात्। परन्तु अनुदानस्य पिधानस्य विषये अधुना प्रतिक्रिया आरब्धा अस्ति। परन्तु अद्यापि निर्णयः कार्यान्वितः नास्ति। अतः अस्मात् पूर्वं सर्वकारः प्रत्येकस्य वर्गस्य स्थितिं ज्ञास्यति, कस्मै कथं आश्रयं दातुं शक्यते इति निर्णयं करिष्यति। बुधवासरे मन्त्रिमण्डलस्य उपसमित्याः गोष्ठी अभवत्, यस्याः अध्यक्षता प्राविधिकशिक्षा तथा नगरनियोजनमन्त्री राजेशधर्माणी अकरोत्। अस्मिन् सत्रे विद्युत्मण्डलस्य विद्युतापूर्तिव्ययस्य न्यूनीकरणाय निर्णयाः कृताः सन्ति। अपि च आवश्यकतानुसारं कर्मचारिणां संख्यां युक्तियुक्तं कर्तुं निर्णयः कृतः अस्ति। यत्र आवश्यकता नास्ति तत्र पदानि निरस्तानि भविष्यन्ति तथा च यत्र आवश्यकता अस्ति तत्र तादृशेषु कार्यालयेषु स्थापितानि भविष्यन्ति। यतः विद्युत्मण्डले प्रायः ११,५०० पदस्थानानि रिक्तानि सन्ति, क्षेत्रे कर्मचारिणां महती आवश्यकता वर्तते।

एतादृशे सति पदं निरस्तं कृत्वा तस्य अवशोषणस्य प्रयासः भविष्यति। बोर्डेन कृतानां विकासात्मकपदानां परिणामः अद्य न आगमिष्यति अपितु पञ्चवर्षेभ्यः अनन्तरं आगमिष्यति। शिमलानगरे एतस्याः सभायाः अनन्तरं मन्त्रिमण्डलस्य उपसमितेः अध्यक्षः राजेशः धर्माणी अवदत् यत् सम्प्रति सर्वकारः ये पदानि गृह्णाति ते विद्युत् बोर्डस्य भविष्याय एव सन्ति। एते विकासाः पञ्चवर्षेभ्यः अनन्तरं दृश्यन्ते ततः बोर्डः आत्मनिर्भरः भविष्यति। अत्र प्रशासनिकव्ययस्य न्यूनीकरणस्य महती आवश्यकता वर्तते। ग्रिडतः क्रीतविद्युत् अल्पमूल्यीयः भवति, परन्तु प्रदत्तस्य विद्युत्स्य मूल्यं अधिकं भवति। एतादृशे सति तस्य व्ययस्य न्यूनीकरणस्य अधिका आवश्यकता वर्तते। सः अवदत् यत् अत्रत्यानां उद्योगानां कृते अधिकमूल्येन विद्युत्प्रदानं कर्तुं शक्यते, परन्तु विकासस्य आवश्यकता वर्तते। केचन महत्त्वपूर्णानि पदानि स्वीकृत्य अत्रत्यानां उद्योगानां कृते न्यूनमूल्येन विद्युत्प्रदानं कर्तुं शक्यते, येन निवेशः अपि वर्धते। राजेशः धर्माणी कर्मचारिणां विषये विशेषाधिकारप्रस्तावस्य विषये पृष्टं प्रश्नं परिहरन् अधुना अस्मिन् विषये चर्चां कर्तुं न शक्नोति इति अवदत्। सः अन्ये केचन प्रश्नाः अपि परिहरति स्म ।

### पुरातनवृत्त्याः (ओपीएस) कृते प्रस्तावः याचितः

राज्यविद्युत्मण्डले पुरातनवृत्तियोजना अद्यापि न कार्यान्विता, यद्यपि मुख्यमन्त्रिणा अस्मिन् विषये आदेशाः निर्गताः। मन्त्रिमण्डलस्य उपसमित्या अस्मिन् विषये चर्चा कृता, कर्मचारिभिः च सह वार्तायां तेभ्यः प्रस्तावः प्राप्तः अस्ति। अस्य कृते संसाधनानि कुतः आगमिष्यन्ति इति विषये अपि कर्मचारिभ्यः सूचनाः प्राप्ताः इति तेभ्यः उक्तम्।

### बोर्डेन वाहनानि न क्रीतानि, अतः चालकानाम् आवश्यकता नास्ति

तकनीकीशिक्षा तथा नगरनियोजनमन्त्री राजेश धर्माणी उक्तवान् यत् कर्मचारिणां आवश्यकतां पूरयितुं बोर्डः हिमाचलप्रदेश- राज्यविद्युत्-विकासनिगमसहित- विभिन्नकम्पनीनाम् आउटसोर्ससेवाद्वारा कर्मचारिणां सेवां सुनिश्चितं करोति। सः अवदत् यत् नूतनपर्यावरण-अनुकूल- स्क्रैपनीतेः अन्तर्गतं राज्ये ई-वाहनानां संचालनस्य प्रचारः क्रियते, २०१८, २०२१ च वर्षेषु वाहनानां क्रयणं न कर्तुं बोर्डेन निर्णयः कृतः। एतत् दृष्ट्वा चालकानां सेवाः बहिःनिर्देशितरूपेण बोर्डेन न गृह्यन्ते।

## हिमाचले ग्राममार्गयोजनायाः कृते ४००० मेलिष्यन्ति लोकनिर्माणन्त्री विक्रमादित्यः



लोक-निर्माण तथा च नगरविकासमंत्री विक्रमादित्यसिंहेनोक्तं यत् प्रधानमंत्री ग्राम सड़कयोजनायाः (PMGSY-4) चतुर्थे चरणे राज्याय 4000 कोटिः अतिरिक्तधनराशिः प्राप्यते। एषा राशिः राज्यस्य ८०० ग्रामेषु उत्तममार्गसंपर्कस्य सुनिश्चित्यै व्ययिता भविष्यति। सः गुरुवासरे चिन्तपूर्णीविधानसभाक्षेत्रस्य भ्रमणकाले अनेकानां महत्त्वपूर्णविकासपरियोजनानां निरीक्षणकाले एव एतत् अवदत्। अस्मिन् काले सः परियोजनानां प्रगतेः समीक्षां कृत्वा अधिकारिभ्यः निर्देशं दत्तवान् यत् सर्वं निर्माणकार्यं निर्धारितसमयान्तरे गुणवत्तापूर्णतया च सम्पन्नं कर्तव्यम् इति। अस्मिन् भ्रमणकाले चिंतपूर्णी विधायकः सुदर्शनसिंह बबलू तस्य सहभागी आसीत्

# न्यायाधीशः संजीव खन्ना देशस्य अग्रिमः मुख्यन्यायाधीशः भविष्यन्ति, सः नवम्बर-मासस्य ११ दिनाङ्के कार्यभारं स्वीकरिष्यति




**हिमसंस्कृतवार्ताः नरेशमलोटिया।** देशस्य अग्रिमः मुख्यन्यायाधीशः न्यायाधीशः संजीव खन्ना भविष्यति। सः नवम्बरमासस्य ११ दिनाङ्के पदं स्वीकुर्यात्। सः देशस्य ५१तमः मुख्यन्यायाधीशः भविष्यति, एतत् भारतस्य विधिमन्त्री अर्जुनराममेघवालः घोषितवान्। भारतस्य मुख्यन्यायाधीशः डी.वाई.चन्द्रचूडः सर्वोच्चन्यायालयस्य वरिष्ठतमस्य न्यायाधीशस्य संजीवखन्नावर्यस्य नाम स्वस्य उत्तराधिकारीरूपेण अनुशंसितवान् आसीत्। भारत-सर्वकारेण निवर्तमानाय मुख्यन्यायाधीशाय डी.वाई.चन्द्रचूडवर्याय पत्रं लिखितम् आसीत् यत् कार्यविधिपत्रानुसारं स्वस्य अनुशंसां प्रेषयतु इति। वस्तुतः भारतस्य मुख्यन्यायाधीशः डी.वाई.चन्द्रचूडः वर्षद्वयस्य कार्यकालस्य अनन्तरं नवम्बरमासस्य १० दिनाङ्के निवृत्तः भविष्यति। न्यायाधीशः संजीव-खन्ना-वर्यः ६५ वर्षीयस्य डी.वाई.चन्द्रचूडस्य सेवानिवृत्तेः एकदिनानन्तरं नवम्बरमासस्य ११ दिनाङ्के शपथं करिष्यति। न्यायाधीशः चन्द्रचूडः २०२२ तमस्य वर्षस्य नवम्बर-मासस्य ८ दिनाङ्के भारतस्य मुख्यन्यायाधीशस्य पदं स्वीकृतवान् आसीत्। न्यायाधीशस्य खन्ना वर्यस्य मुख्यन्यायाधीशपदं प्रायः षड्मासान् यावत् भविष्यति, सः २०२५ तमस्य वर्षस्य मे-मासस्य १३ दिनाङ्के निवृत्तः भविष्यति। विधिमन्त्री अर्जुनराममेघवालः अवदत् यत्, "भारतस्य संविधानेन प्रदत्तस्य अधिकारस्य प्रयोगेण माननीयः राष्ट्रपतिः भारतस्य माननीयेन मुख्यन्यायाधीशेन सह परामर्शं कृत्वा भारतस्य सर्वोच्चन्यायालयस्य न्यायाधीशं संजीव खन्नां मुख्यरूपेण नियुक्तं करोति।" ११ नवम्बर २०२४ तः भारतस्य न्यायाधीशः संजीव खन्ना भविष्यन्ति।"

# संस्कृतभारत्याः सम्मेलननिमित्तं पटियालानगरे सम्पन्ना प्रान्तगोष्ठी



संस्कृतभारतीपंजाबप्रान्तस्य प्रान्तसम्मेलननिमित्तं पटियालानगरे गोष्ठीसम्पन्ना। अस्यां गोष्ठ्यां संस्कृतभारत्याः उत्तरक्षेत्रसंघटनमन्त्री नरेन्द्रकुमारः मुख्यरूपेण उपस्थितः। गोष्ठ्यां सम्मेलनस्य रूपरेखायाः विषये चर्चा जाता। मन्त्रिणा उक्तं यत्- पंजाबप्रान्ते संस्कृतस्य वातावरणनिर्माणाय, संस्कृतस्य प्रचार-प्रसाराय च अस्माभिः प्रयासाः करणीयाः। अस्मिन् अवसरे सम्मेलनस्य सज्जतायाः विषयेऽपि चर्चा जाता। संस्कृतभारतीपंजाबस्य प्रान्ताध्यक्षः डॉ. वीरेन्द्रकुमारः विभिन्नेभ्यः कार्यकर्तृभ्यः सम्मेलनाय दायित्वान् दत्तवान्। अधिकारिगणाः आयोजनस्थलस्य निरीक्षणम् अपि कृतवन्तः। अस्मिन्नवसरे पंजाबप्रान्तमन्त्री संजीव श्रीवास्तवः, प्रान्तसहमन्त्री अजय आर्यः, पटियालाविभागसंयोजकः डॉ. ओमनदीपः, पटियाला सम्पर्कप्रमुखः डॉ. रविदत्तः, शिक्षणप्रमुखः डॉ. राहुलादयः उपस्थिताः आसन्।

## सर्वकारीय-मार्गसुरक्षा- पारिस्थितिकी-तन्त्रे कृत्तिमबुद्धिमत्ता-सदृशानां सर्वासां उन्नतप्रविधीनां कार्यान्वयनं क्रियते-नितिनगडकरी

राष्ट्रिय-राजमार्ग-परिवहनमन्त्री नितिन गडकरी इत्येषः प्रोक्तवान् यत् सर्वकारीय-मार्गसुरक्षा- पारिस्थितिकी-तन्त्रे कृत्तिमबुद्धिमत्ता-सदृशानां सर्वासां उन्नतप्रविधीनां कार्यान्वयनं क्रियते। नवदिल्ल्यां ट्रैफिक-इंफ्राटेक-एक्सपो इत्यस्य द्वादशतमं संस्करणं सम्बोधयन् सः मार्गनिर्माण उन्नतप्रविधेः प्रयोगाय बलं दत्तवान्। तेन प्रोक्तं यत् सर्वकारः प्रतिभाशालि- अभियन्तॄन् प्रोत्साहयति येन चालकानां कृते मार्गाः सुरक्षायुताः स्युः।

# श्रीरामायणकथा, उत्तरकाण्डम्!
## (एकचत्वारिंशः सर्गः)
## श्रीरामद्वारा निमिवसिष्ठयोः वृत्तान्तकथनम्।



नृगशापस्य एषः मया विस्तरोऽभिहितः। श्रवणे यदि तव श्रद्धा अस्ति तर्हि अपरां कथां शृणु। राघवेण एवमुक्तः लक्ष्मणः पुनरब्रवीत् हे राजन्! आश्चर्यभूतानां कथानां मम तृप्तिर्नास्ति। लक्ष्मणेन एवमुक्तः राघवः परमधर्मिष्ठां कथां व्याहर्तुम् आरभत। महात्मनः इक्ष्वाकोः द्वादशमः पुत्रः वीर्ये धर्मे च परिनिष्ठितः निमिर्नाम राजा आसीत्। सः राजा ऋषेः गौतमस्य आश्रमस्य समीपे देवपुरोपमं वीर्यसम्पन्नं पुरं न्यवेशयत्। राजर्षिः निमिः यत्र निवसति स्म तस्य पुरस्य नाम वैजयन्तमिति श्रुतम् अभवत्। सुमहापुरं निवेश्य तस्य राज्ञः बुद्धिः समुत्पन्ना यत् पितुः मनः प्रह्लादयन् अहं दीर्घसत्रेण यजेयम् इति। ततः सः पितरम् इक्ष्वाकुम् आमन्त्र्य पूर्वं ब्रह्मर्षिसत्तमं वसिष्ठम् अवरयत्। अनन्तरं सः इक्ष्वाकुनन्दनः राजर्षिः निमिः अत्रिम्, अङ्गिरसं, तपोनिधिं भृगुं चैव अवरयत्। तस्मिन् समये महर्षिः वसिष्ठः अब्रवीत् - पूर्वम् इन्द्रेण वृतः अहम् , अतस्त्वम् अन्तरं प्रतिपालय। तदनन्तरं महाविप्रः गौतमः ऋषेः वसिष्ठस्य कार्यं प्रत्यपूरयत्। ऋषिः वसिष्ठः तदा इन्द्रस्य यज्ञम् अकरोत्। राजा निमिः तान् विप्रान् समानीय स्वपुरस्य समीपतः हिमालयस्य पार्श्वे पञ्चवर्षसहस्राणि यावत् अयजत्। देवराजः इन्द्रस्तु वर्षसहस्राणि यावत् अश्वमेधयज्ञम् अकरोत्। इन्द्रस्य यज्ञावसाने भगवान् ऋषिः वसिष्ठः राज्ञः निमेः सकाशं हौत्रं कर्तुम् आगतः। तत्र समागत्य ब्रह्मणः पुत्रः ऋषिः वसिष्ठः ऋषिणा गौतमेन तदभिपूरितम् इति दृष्ट्वा अत्यन्तं कुपितः अभवत्। परन्तु तथापि भगवान् वसिष्ठः राज्ञः दर्शनाकाङ्क्षी मुहूर्तं समुपाविशत् किन्तु तस्मिन् अहनि राजर्षिः निमिः भृशं निद्रया अपहृतः आसीत्। ततः राजर्षेः अदर्शनेन कुपितः ऋषिः वसिष्ठः तमब्रवीत् हे राजन्! यस्मात् त्वं माम् अवज्ञाय अन्यं कृतवान् तस्मात् त्वं चेतनेन विनाभूतः भविष्यसि। ऋषिणा वसिष्ठेन शापमुदाहृतं श्रुत्वा प्रबुद्धः क्रोधमूर्च्छितः राजा निमिः तं ब्रह्मयोनिं वसिष्ठम् अब्रवीत् - अहम् अजानतः शयानः आसं तथापि त्वं क्रोधेन मह्यं यमदण्डमिव अपरं शापम् अददाः। तस्मात् हे ब्रह्मर्षे! तवापि चेतनेन विनाकृतः देहः भविष्यति इत्यत्र संशयः नास्ति। एवं तदानीं तौ उभावपि रोषवशाद् अन्योन्यं शपितौ अभवताम्। ततः तौ उभावपि सहसा विदेहौ अभवताम्।

राघवस्य भाषितं श्रुत्वा प्राञ्जलिर्भूत्वा लक्ष्मणः राघवं पुनरब्रवीत् हे काकुत्स्थ! ततः तौ द्विजपार्थिवौ देहौ निक्षिप्य पुनः तौ कथं देहेन संयोगम् अगच्छताम्? लक्ष्मणेन एवमुक्तः इक्ष्वाकुनन्दनः रामः लक्ष्मणं प्रत्यब्रवीत् हे लक्ष्मण! तदा तौ धार्मिकौ नृपविप्रर्षी परस्परशापेन देहमुत्सृज्य वायुभूतौ अभवताम्। ततः अशशीरः महामुनिः वसिष्ठः अन्यशरीरस्य कृते पितुः अन्तिकम् अगच्छत्। तत्र गत्वा वायुभूतः धर्मविद् ऋषिः वसिष्ठः देवदेवस्य पादौ अभिवाद्य पितामहं ब्रह्मदेवं वचनमब्रवीत् हे भगवन्! निमिशापेन अहं विदेहत्वम् उपागमम्। हे देवदेव! अहं वायुभूतोऽस्मि। देहहीनानां सर्वेषां महद् दुःखं भवति। देहहीनस्य सर्वकार्याणि लुप्यन्ते। अतः हे प्रभो! त्वम् अन्यदेहस्य सद्भावे प्रसादं कर्तुमर्हसि।



हिमसंस्कृतवार्ता, प्रदीपः
pradipnath997@gmail.com

# त्वत्कृते



गीतगुच्छो मया लिख्यते त्वत्कृते।
प्रेमरागेण तद्गीयते त्वत्कृते।।
आगमो ग्रामके ते गृहे चक्रकम्।
प्रत्यहं यन्मया यत्यते त्वत्कृते।।
शान्त एकान्तके त्वां भृशं चिन्तयन्।
दर्शनार्थंमया स्थीयते त्वत्कृते।।
नूतनं वासितं वाससो युग्मकम्।
यद्धि धृत्वा सदा भ्रम्यते त्वत्कृते।।
आपगायास्तटे बालुकायां वरम्।
हस्तकञ्जेन यल्लिख्यते त्वत्कृते ।।
अर्चनाकालके मन्दिरे पावने।
ध्यानलीनेन सम्प्रार्थ्यते त्वत्कृते।।
दीपमालोत्सवे दीपकानां ततिः।
सद्मनश्चत्वरे ज्वाल्यते त्वत्कृते।।
निर्जने कानने वेणुकायाः रवः।
भावमग्नेन वै तन्यते त्वत्कृते।।
नो महेशो मनाग् यातुमीहे कदा।
दूरदूरं यतो जीव्यते त्वत्कृते।।

हिमसंस्कृतवार्ताः
महेशशास्त्री
कुरेडा, टोङ्क,राजस्थानम्

## ।। नास्तिकः- आस्तिकः ।।



एकः शिक्षकः उक्तवान् यत् ईश्वरः नास्ति।
अहं पृष्टवती- भवान् कथं जानाति?
शिक्षकः उक्तवान् यत् अहं शिक्षकः अस्मि। सामान्यज्ञानतः, यां वयं न द्रष्टुं शक्नुमः, सः भवितुं न शक्नोति। अतः ईश्वरः नास्ति।
अहं विचारं कृत्वा शिक्षकं पुनः पृष्टवती- भवतः समीपे सामान्यज्ञानं कुत्र अस्ति?
शिक्षकः उक्तवान् यत् मम मस्तिष्के अस्ति।
अहं पुनः पृष्टवती- भवन्तं दृश्यते किम्?
शिक्षकः उक्तवान्- न
अहं झटिति उक्तवती- इत्युक्ते भवतः समीपे कॉमन सेंस अथवा सामान्यज्ञानं नास्ति
😀🤣😅😀😂🤪

*हास्यकणिका विशेषज्ञा-*
*विदुषी अग्रवाल*
*प्रेरणास्रोतः:-*
*महाभागः महेन्द्रमिश्र महोदयः*